# Mantraraja Shatanamavali

# मन्त्रराजशतनामावलिः

## Document Information

Text title : Mantraraja Shatanamavali

File name : mantrarAjashatanAmAvaliH.itx

Category : shiva, mantra, nAmAvalI, aShTottarashatanAmAvalI

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri. See corresponding stava.

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# मन्त्रराजशतनामावलिः

ॐ ओङ्कारगम्याय नमः । ओङ्कारवाच्याय । ओङ्कारविग्रहाय ।
ओङ्कारशुक्तिकामुक्तामणये । ओङ्कारवल्लभाय । ओङ्कारबिलपञ्चास्याय ।
ओङ्कारसुषिरोरगाय । ओङ्कारपञ्जरशुकाय । ओङ्कारान्तरवासकाय ।
ओङ्कारनलिनीहंसाय । ओङ्कारावालकन्दराय । ओङ्कारसुमसौरभ्याय ।
ओङ्कारशमिहव्यवाहे । ओङ्कारगोक्षीरसर्पिषे । ओङ्काराम्बरभास्कराय ।
ओङ्कारदीपसुज्योतिषे । ओङ्कारद्विजराड्धाये । ओङ्कारवेदोपनिषदे ।
ओङ्कारफलसद्रसाय । ओङ्कारनवमाणिक्यसौधसन्निष्ठभूपतये नमः ॥ २०
ॐ नगेन्द्रतनयानाथाय नमः । नानारूपसमन्विताय ।
नवनीलघनश्यामकन्धराय । नागकुण्डलाय । नमज्जनामरतरवे ।
नटनोत्सुकमानसाय । नागभुग्वाहजनकाय । नक्षत्रेशशिखामणये ।
नवकर्पूरगौराङ्गाय । नलिनेक्षणसायकाय । नादबिन्दुकलातीताय ।
नागचर्मोत्तरीयकाय । नागास्यजनकाय । नम्याय । नन्दिकेशसमर्चिताय ।
नारायणार्चिताय । नानानिगमोदितमूर्तिमते ।
नारसिंहमहादर्पकदलीवनकुञ्जराय । नवन्नवनमल्लोकसङ्घ-
कारुण्यवार्षिकाय । नमद्ब्रह्मादिकोटीरनवरत्नोज्ज्वलाङ्घ्रिकाय नमः ॥ ४०॥

ॐ मायातीताय नमः । महामायिने । मनोवाचामगोचराय ।
मञ्जुलाङ्गाय । महायोगिने । महामेरुशरासनाय । मन्मथध्वंसकाय ।
मौनिने । मधुधारातिभाषकाय । महीरथाय । महादेवाय ।
महोक्षवरवाहनाय । माधुर्यजाह्नवीवीचीसम्प्लावितजटातटाय ।
मनोरथफलातीतवरप्रदपदाम्बुजाय । महाप्रलयसञ्चारिणे ।
महाकालाय । महानटाय । मधुरापुरमध्यस्थविमानान्तरवासकाय ।
मार्ताण्डकोटिसदृशाय । मायापुरनिवासकाय नमः ॥ ६०॥

ॐ शिवाकृतये नमः । शिवाकाराय । शिवानन्दवपुर्धराय
शिवाप्रियाय । शिवाज्ञेयाय । शिवयोगवनेश्वराय । शिवाधाराय ।
शिवमयाय । शिवासक्तहृदम्बुजाय । शिवाङ्गीकृतवामाङ्गाय ।

शिवलोकेश्वराय । शिवाय । शिवासहायाय । शिखिदृशे ।
शिखण्डिने । शिवलोकदाय । शिवक्षेत्रविलासिने ।
शिखरीन्द्रनिकेतनाय । शिवभक्तहृदम्भोजनिवासिने । शिवपूःपतये
नमः ॥ ८०॥

ॐ वाग्मिने नमः । वरिष्ठाय । वरदाय । वाताशविलसत्कराय ।
वसुप्रदाय । वासुदेववर्यचक्रायुधप्रदाय । वरकुन्दद्रुमावासिने ।
वटमूलतटाश्रयाय । वसुन्धरामराकाराय । वन्द्याय । वात्सल्यवारिधये ।
वामदेवाय । वर्यवर्याय । वराभयकराम्बुजाय । वसुरेतसे ।
वरेण्याय । वासवाद्यमरार्चिताय । वशीकृताखिलाण्डाय । वाक्प्रदाय ।
वरदेशिकाय नमः ॥ १००॥

ॐ यज्ञकृते नमः । यज्ञहृदे । यज्ञध्वंसिने । यज्ञेश्वराय ।
यमिने । यमाद्यष्टाङ्गसन्दृश्याय । यन्त्रे । यज्ञविदुत्तमाय ।
यथेच्छासृष्टभुवनाय । यथार्थजनवत्सलाय ।
यथाश्रितजनक्लेशाय । यज्ञसन्दृश्यविग्रहाय ।
यमप्रहर्त्रे । यक्षेशसखाय । यातुगुणान्तकाय । यज्ञमृग्याय ।
यज्ञसाध्याय । यज्ञविश्रान्तिभूरुहाय । यतीशाय ।
यतिचित्तारविन्दनृत्तविधायकाय नमः ॥ १२०॥

ॐ आत्मने नमः । अन्तरात्मने । परमात्मने । आदिकैलासनायकाय ।
आत्मनाथाय । तीर्थनाथाय । शब्दनाथाय । सदाशिवाय नमः ॥ १२८॥

इति मन्त्रराजशतनामावलिः समाप्ता ।

Proofread by Aruna Narayanan

*Mantraraja Shatanamavali*

pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*